M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 826

Title: Shiksha

તૈત્તિરીયાપવિત્ય

પટ્ટે ઈતલ્લ.

Canc

826

शिक्षा

Shikshā : Title

: Author

: Editor

: Year. Vols.

: Publisher

: Remarks

826

श्रीगणेशायनमः हरिः ॐ। शंनोमित्रः शंवरुणः। शंनोभवत्वर्यमा। शंनइंद्रो बृहस्पतिः।
शंनोविष्णुरुरुक्रमः। नमोब्रह्मणे। नमस्तेवायो। त्वमेवप्रत्यक्षंब्रह्मासि। त्वमेवप्रत्यक्षंब्रह्मवदि
ष्यामि। ऋतंवदिष्यामि। सत्यंवदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतुमां। अवतुवक्ता
रं ॐशांतिः ३। ॐ शीक्षांव्याख्यास्यामः। वर्णः स्वरः। मात्राबलं। साममसंतानः। इत्युक्तः शीक्षा
ध्यायः १॥ शीक्षांपंच॥१। सहनौयशः। सहनौब्रह्मवर्चसं। अथातस्संहिताया उपनिषदंव्या
ख्यास्यामः। पंचस्वधिकरणेषु। अधिलोकमधिज्योतिषमधिविद्यमधिप्रजमध्यात्मं। ता
महासंहिताइत्याचक्षते। अथाधिलोकं। पृथिवीपूर्वरूपं। द्यौरुत्तररूपं। आकाशः संधिः १॥
वायुःसंधानं। इत्यधिलोकं। अथाधिज्यौतिषं। अग्निः पूर्वरूपं। आदित्यउत्तररूपं। आपः सं
धिः। वैद्युतः संधानं। इत्यधिज्यौतिषं। अथाधिविद्यं। आचार्यः पूर्वरूपं २। अंतेवास्युत्तररू
पं। विद्यासंधिः। प्रवचनं संधानं। इत्यधिविद्यं। अथाधिप्रजं। मातापूर्वरूपं। पितोत्तररूपं।
प्रजासंधिः। प्रजननं संधानं। इत्यधिप्रजं। २। अथाध्यात्मं। अधराहनुः पूर्वरूपं। उत्तराहनु
रुत्तररूपं। वाक्संधिः। जिह्वासंधानं। इत्यध्यात्मं। इतीमामहासंहिताः। यएवमेतामहासं
हिताव्याख्यातावेद। संधीयतेप्रजयापशुभिः। ब्रह्मवर्चसेनान्नाद्येनसुवर्गेणलोकेन। ४॥
संधिराचार्यः पूर्वरूपमित्यधिप्रजंलोकेन॥ २॥ यश्छंदसामृषभोविश्वरूपः। छंदोभ्यो

ध्यमृतात्संबभूव। समेंद्रोमेधयास्पृणोतु। अमृतस्यदेवधारणोभूयासं। शरीरंमेविचर्षणं।
जिह्वामेमधुमत्तमा। कर्णाभ्यांभूरिविश्रुवं। ब्रह्मणःकोशोसिमेधयापिहितः। श्रुतंमेगोपाय। आ
वहंतीवितन्वाना।१। कुर्वाणाचीरमात्मनः। वासांसिममगावश्च। अन्नपानेचसर्वदा। ततोमेश्रि
यमावह। लोमशांपशुभिःसहस्वाहा। आमायंतुब्रह्मचारिणःस्वाहा। विमायंतुब्रह्मचारिणःस्वाहा।
प्रमायंतुब्रह्मचारिणःस्वाहा। दमायंतुब्रह्मचारिणःस्वाहा। शमायंतुब्रह्मचारिणःस्वाहा।।२।। यशोजनेऽ
सानिःस्वाहा। श्रेयान्वस्यसोसानिःस्वाहा। तंत्वाभगप्रविशानिःस्वाहा। समाभगप्रविशःस्वाहा। तस्मिन्
सहस्रशाखे। निभगाहंत्वयिमृजेस्वाहा। यथापःप्रवतायंति। यथामासाअहर्जरं। एवंमांब्रह्मचारि
णः। धातरायंतुसर्वतःस्वाहा। प्रतिवेशोसिप्रमाभाहिप्रमापद्यस्व।३। वितन्वाना। शमायंतुब्रह्मचा
रिणःस्वाहा। धातरायंतुसर्वतःस्वाहेकंच।।४।। भूर्भुवःसुवरितिवाएतास्तिस्रोव्याहृतयः। तासामु
हस्मैतांचतुर्थीं। माहाचमस्यःप्रवेदयते। महइति। तद्ब्रह्म। सआत्मा। अंगान्यन्यादेवताः। भूरितिवा
अयंलोकः। भुवइत्यंतरिक्षं। सुवरित्यसौलोकः।१। महइत्यादित्यः। आदित्येनवावसर्वेलोकामहीयं
ते। भूरितिवाअग्निः। भुवइतिवायुः। सुवरित्यादित्यः। महइतिचंद्रमाः। चंद्रमसावावसर्वाणिज्यो
तींषिमहीयंते। भूरितिवाऋचः। भुवइतिसामानि। सुवरितियजूंषि।२। महइतिब्रह्म। ब्र
ह्मणावावसर्वेवेदामहीयंते। भूरितिवैप्राणः। भुवइत्यपानः। सुवरितिव्यानः। महइत्यन्नं। अन्नेनवाव

वसर्वेप्राणामहीयंते। तावाएताश्चतस्रश्चतुर्धा। चतस्रश्चतस्रोव्याहृतयः। तायोवेद। सवेदब्र
ह्म। सर्वेस्मैदेवाबलिमावहंति ३। असौलोकोयजूंषि। वेदद्वेव।५। सयएषोंतर्हृदयआकाशः। त
स्मिन्नयंपुरुषोमनोमयः। अमृतोहिरण्मयः। अंतरेणतालुके। यएषस्तनइवावलंबते। सेंद्रयोनिः।
यत्रासौकेशांतोविवर्तते। व्यपोह्यशीर्षकपाले। भूरित्यग्नौप्रतितिष्ठति। भुवइतिवायौ।१। सुव
रित्यादित्ये। महइतिब्रह्मणि। आप्नोतिस्वाराज्यं। आप्नोतिमनसस्पतिं। वाक्पतिश्चक्षुष्पतिः। श्रो
त्रपतिर्विज्ञानपतिः। एतत्ततोभवति। आकाशशरीरंब्रह्म। सत्यात्मप्राणारामंमनआनंदं। शांतिसमृ
द्धममृतं। इतिप्राचीनयोग्योपास्स्व २। नायावमृतमेकंच ६। पृथिव्यंतरिक्षंद्यौर्दिशोवांतरदिशाः
अग्निर्वायुरादित्यश्चंद्रमानक्षत्राणि। आपओषधयोवनस्पतयआकाशआत्मा। इत्यधिभूतं। अ
थाध्यात्मं। प्राणोव्यानोपानउदानसमानः। चक्षुःश्रोत्रंमनोवाक्त्वक्। चर्ममांसंस्नावास्थिमज्जा
एतदधिविधायऋषिरवोचत्। पांक्तंवाइदंसर्वं। पांक्तेनैवपांक्तंस्पृणोतीति।१। सर्वमेकंच।।
ओमितिब्रह्म। ओमितीदंसर्वं। ओमित्येतदनुकृतिहस्मवाअप्योश्रावयेत्याश्रावयंति। ओमिति
सामानिगायंति। ओंशोमितिशस्त्राणिशंसंति। ओमित्यध्वर्युःप्रतिगरंप्रतिगृणाति। ओमितिब्र
ह्माप्रसौति। ओमित्यग्निहोत्रमनुजानाति। ओमितिब्राह्मणःप्रवक्ष्यन्नाहब्रह्मोपाप्नवानीति। ब्रह्मैवो
पाप्नोति।१।। ओंदश।८।। ऋतंचस्वाध्यायप्रवचनेच। सत्यंचस्वाध्यायप्रवचनेच। तपश्चस्वा

826

शिक्षा ध्यायप्रवचने च। दमश्च स्वाध्यायप्रवचने च। शमश्च स्वाध्यायप्रवचने च। अग्नयश्च स्वाध्या०। अ
ग्निहोत्रं च स्वाध्या०। अतिथयश्च स्वा०। मानुषं च स्वा०। प्रजा च स्वा०। प्रजनश्च स्वा०। प्रजातिश्च स्वाध्या०।
२ सत्यमिति सत्यवचा राथीतरः। तप इति तपोनित्यः पौरुशिष्टिः। स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि
तपस्तद्धि तपः। ९। प्रजा च स्वाध्यायप्रवचने च षट् च। अहं वृक्षस्य रेरिव। कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वप
वित्रो वाजिनीव स्वमृतमस्मि। द्रविणं सवर्चसं। सुमेधा अमृतोक्षितः। इति त्रिशंकोर्वेदानुवचनं। १०। अहं
षट् १०। वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय
प्रियं धनमाहृत्य प्रजातंतुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यं। धर्मान्न प्रमदितव्यं। कुशलान्न प्रमदितव्यं।
भूत्यै न प्रमदितव्यं। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं। १। देवपितृकार्याभ्यां न प्रमदितव्यं। मातृदेवो
भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इ
तराणि। यान्यस्माकं सुचरितानि। तानि त्वयोपास्यानि। २ नो इतराणि। ये के चास्मच्छ्रेयांसो ब्राह्मणाः। तेषां
त्वयासनेन प्रश्वसितव्यं। श्रद्धया देयं। अश्रद्धयादेयं। श्रिया देयं। ह्रिया देयं। भिया देयं। संविदा देयं। अथ य
दि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ३। ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः। अलूक्षा ध
र्मकामाः स्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र०। युक्ता०। अलू०। तथा ते तेषु वर्ते ते
रन्। तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनं। एवमुपासितव्यं। एवमु चैतदुपास्यं।
स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं। तानि त्वयोपास्यानि स्यान्नितेषु वर्तेरन् सप्त च। ११। शं नो मित्रः शं वरुणः। शं नो भ
वत्वर्यमा। शं न इंद्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्र २
ह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मां। अवतु वक्तारं। ओं शांतिः ३॥ १२
शं नो दिवं। ऋतमवादिषं। सत्यमवादिषं। तन्मामावीत्। तद्वक्तारमावीत्। आवीन्मां। आवीद्वक्तारं। ओं शांतिः ३॥ १२
शं नः शिक्षां सह नौ यश्छंदसां भूः सयः पृथिव्योमित्यहं वेदमनूच्य शं नो द्वादश। १२। शं नो मह इत्यादि तो नो इ
इतराणि त्रयोविंशतिः। शं नो मित्रः शं वरुणः॥ ॥ इति शीक्षा समाप्ता॥ श्रीः